# पारम्परिकबौद्धिकशिक्षणस्य स्वरूपम्

डॉ. हरिप्रसादः पाण्डेयः
बडौदा-संस्कृतमहाविद्यालयः,
म.स.विश्वविद्यालयः वटोदरम्

**''एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ।।'' १**

अनेनेदं ज्ञायते यत् भारते विभिन्नाः विश्वविद्यालयाः आसन् । विश्वेऽस्मिन् पृथिव्याम् सर्वेमानवाः चरित्रनिर्माणाय ज्ञानवर्द्धनाय अत्र आगतवन्तः । तत्र नालन्दा, तक्षशिला, वल्लभी, विक्रमशिला प्रसिद्धिं प्राप्य भारतस्य गौरवगाथां गायन्ति । अलबरूनी विविधान् शास्त्रान् अधीत्य बगदादनगरे प्रयोगशाला स्थापिता । चीनी यात्री ह्यानसांग लिखति--''आचार्य साधारण अर्थ की व्याख्या कर देते हैं और फिर भावर्थ और गूढ तत्व समझा देते हैं । वे विद्यार्थियों को कर्मण्य बना देते हैं और कुशलता पूर्वक उन्हें प्रगति पथ पर अग्रसर कर देते हैं । वे आलसी और मंदबुद्धि को भी कर्तव्य परायण और प्रतिभाशाली बला देते हैं यदि प्रतिभाशाली विद्यार्थी किसी कारण से विरक्त हो जाता था तो आचार्य उसे छोडता नहीं था । उसे किसी न किसी प्रकार अध्ययन में लगाये रखता था ।''२

अनेन स्पष्टं भवति यत् वेदादि शास्त्राणां सार्थं सान्वयपूर्वकं पठनपाठनपरम्परा आसीत् । प्रथमं अध्यापकः विद्यार्थिनां हृदि रूचिं उत्पादयति पश्चाद् पाठयति ।

**''युवा सुवासा परिवीत आगत् सनुश्रेयान्भवति जायमानः ।**
**तं घीरासः कवयः उन्नयन्ति स्वाध्योमनसा देवयन्तः ''।।३**

ऋग्वेदस्य मन्त्रमिदं स्पष्टयति यत् आचार्याः छात्रान् उन्नयन्ति । श्रेष्ठात् श्रेष्ठतमं कुर्वन्ति ।

**''आचार्यमुपनयमानो ब्रह्मचारिणं कुरूते गर्भमन्तः ।**
**तं रात्रीस्त्रिस्र उदरेविभर्ति तं जातं द्रष्टुमभिसंयन्तिदेवाः ।।''४**

अथर्ववेदस्य वाक्यमिदं यथा मातुः शिशुः गर्भेः धारायति । गुरोः गर्भेः शिशुः पोषितो भवति । चाणक्येनोक्तं चन्द्रगुप्त! त्वम् मम गर्भेऽस्ति । त्वामहं गर्भे धारयामि । ब्रह्मचारी द्वितीयं जन्म गृहणाति । तस्य द्वितीय बारं जन्म भवति, अतः द्विजेति कथ्यते । आचार्योपसर्जनश्च अन्तेवासी यथा तित्तिराचार्यस्य तैत्त्तिरीयः अपिशाली इत्यस्य अपिशलः, पाणिनेः पाणिनीयः। स्वामिनाराणः, स्वामीनारायणीयः ।

गुरूशिष्योर्सम्बन्धः योनिसम्बधमिव सदृशं पवित्रमासीत् । काशिका काशिकमुक्तं वर्तते । यत् '' आचार्यकरणं आचार्यक्रिया माणवकभीदृशेन विधिनाऽऽत्म समीपं प्रापयति यथा स उपनेता स्वयमाचार्यः संपद्यते । माणवमुपनयते । आत्मानमाचार्यी कुर्वन्माणवकोमात्म समीपं प्रापयतीत्यर्थः ।''५ गुरूशिष्योर्सम्बन्धं ब्रुवता पतंजलिना उक्तं गुरूछत्रम् । गुरूणा शिष्यश्छत्रवत् छाद्यः । शिष्येण च गुरूश्छत्रवत् परिपाल्यः ।''६

उक्तं च छत्रं शीतमस्य वर्षातपे शीतकाले च गुरू छत्रमिव आसीत् ।

गुरूतीर्थान्याहुः अपितु तीर्थादप्यधिकं महत्वपूर्णस्थानं गुरोरासीत् वेदेषु सर्वत्र गुरोः महत्वं चर्चितं वर्तते ।

**हितोपदेशानुसारेण गुरूः साक्षात् ब्रह्मा प्रजापतिरिव ।**
**''यन्नवे भाजने लग्न संस्कारो नान्यथा भवेत् ।**
**कथाच्छलेनेव बालानाम् नीतिस्तदिह कथ्यते ।''७**

शिक्षा आजीवनं चलति । गर्भे जायमानः शिशुः सर्वं जानति । अभिमन्युः गर्भावस्थायामेव चक्रव्युहभेदनक्रियां ज्ञातवान् । आचार्यो अनूचानः प्रवचनीयश्च । योऽनूचानः स नो महान् । शिक्षायाः मूलं ब्रह्मचर्यं प्रणालिरेवासीत् । उक्तं च तदस्य ब्रह्मचर्यम्'८

जीवनस्य आन्तरिक विकासाय बलं, ज्ञानं, संचयाय संयमस्य प्राधान्यमासीत् । वेदाः अस्माकम् बौद्धिक संपादरूपेणासन् । अनेकानेक बारं असुरैः वेदानाम् अपहरणं कृतम् । तत्र हयग्रीवेन हिरण्याक्षेन तथा महिषासुरेः वेदा अपहृता । यवनैः म्लेच्छैरपि वेदादिशास्त्रं प्रज्वालितावन्तः । अतः

वेदानां संरक्षणं कंठस्थीकरणंमाश्यकमासीद् । वेदनां गोपनं न संश्राव्यः शूद्रजातिषु अथवा सामान्यजनानाम् न देयं वेदसम्पदा। उक्तं च साहित्यदर्पणकारेण-वेदादिशास्त्रं तु केवलं परिणत बुद्धी कृतेरैव । नाल्प्याधियाम् अल्पबुद्धीनाम् कृतेरेव ।

शतपथ ब्राह्मणे सर्वप्रथमं गुरोः समीपे समिधाधानं करोति । समिद्पाणिं गच्छति । ९
विद्याध्ययने जातिभेदः नासीत् । उपनयनं गृहीत्वा वेदाध्ययनाय विद्यानामासीत् । जाबालायाः पुत्रो जावालः गोत्रज्ञानं विना वेदाध्ययनाय प्रवेशः प्राप्तः । महर्षि सांदीपनेः आश्रमे सुदामाकृष्णयोः एकः सहैव विद्याध्यायनमभवत्। वर्णाश्रम व्यावस्थायाम् शूद्रस्यापि तथैवाधिकारः आसीत् उपनयनं गहीत्वा यज्ञोपवीती भूत्वा वेदाध्ययनं कर्तुं शक्यते । वर्णाश्रमव्यवस्थायाम् यः गुरूकुलं पठनाय गच्छति स वर्णीत्युच्यते । वर्णीश्रमाणाम् गुरूवे सवर्णी ।

तदानीन्तने काले गुरोराज्ञा बलीयसी आसीत् । गुरोः वैशम्पायनस्य आज्ञां विना याज्ञवल्केनाधीतं शास्त्रं नष्टं जातम् ।

**''ततः क्रुद्धोः गुरूः प्राह याज्ञवल्क्यंमहामुनिम् ।**
**मुच्यतां यत्वयाधीतं महतो विप्रावमानक ।।''१०**

**शिष्यस्य मृतेजाते सति गुरोः रात्रि पर्यन्तं अशौचं भवति ।**
**प्राचीनकाले आचार्यो ब्रह्मणः मूर्तिरिवासीत् ।**
**गुरूरावाहनीयश्च देदीप्यमानाः वपुषा ।**
**मनुष्य चर्मणः बद्धः साक्षात् शिवः स्वयम् । ११**

**''ब्राह्मोपदेशमेकत्रवेदशास्त्राण्यथैकतः ।**
**आचार्यः स तु विज्ञेयस्तदैकस्तु देशिकाः ।।**
**उपनीयत तु यः शिष्यंवेदमध्यापयेद्विजः ।**
**संकल्पसरहस्यं तमाचार्य प्रचक्षते ।।'' १२**

यः वेदादिशास्त्राणाम् परम्परायां अध्ययनं करोति कारयति च स आचार्यः ।

**उपनीय तु यः शिष्यं वेदमध्याययेद्विजः ।**
**संकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ।।**

शिष्यमुपनीय न केवलं वेदं पाठयति अपितु वेदानां रहस्यं पाठयति स आचार्यः । एवं गुरू त्रिलिधं प्रोक्तम् --
आचार्यः, उपाध्यायः, श्रोत्रियश्च । यः वेदं पाठयति तस्य रहस्यमपि वदति स आचार्यः । यः वेदान् वेदाङ्गन्यपि पाठयति परन्तु धनं स्वीकृत्य पाठयति । वृत्यर्थं पाठयति स उपाध्यायः ।

**''एकदेशं तु वेदस्य वेदाङ्गान्यपि पुनः ।**
**योध्यापयति वृत्यर्थमुपाध्यायः स उच्यते ।।''**[१३]

श्रीमद्भागवते यः धनं नीत्वा पाठयति सनिन्दनीयः ।

**''अट्टशूलाः जनपदाः शिवशूला द्विजातयः ।**
**कामिन्यः केश शूलिन्यः भविष्यन्ति कलौयुगे ।।''** [१४]

काश्यां वेदाध्ययनं नैरन्तर्यं प्रचलतिस्म । यथा गुरोः प्रकार त्रयं प्रसिद्धं आचार्यः उपाध्यायः श्रोत्रियश्च तथैव छात्राणामपि प्रकारद्धयमासीत् । दण्डमाणकः अन्तेवासिनश्च । कालान्तरेण छात्राणमपि विभागत्रयं अभवत् माणवकः अन्तेवासिनः चरकश्चेति ।

यः केवलं छंदशास्त्रं अथवा छंदनाम् रटनं कारयति स श्रोत्रियत्वेनोच्यते । उक्तं च श्रोत्रियश्चछंदोऽधीते।[१५]
अस्य संबंधः केवलं वेदानां पारायणेन सह आसीत् ।

**''अकाल गर्जितादौ च पर्वस्वा शौचकादिषु ।**
**अनध्ययनं बुधः कुर्यादुपरागादिके तथा ।।''** [१६]

अशौचे अनध्यायः । अनध्याये अधीयानो दण्ड्यः । अध्यापकश्च द्विमुणं तथा । [१७] विद्यामधीत्य गुरूकुलाद् आगतानाम् छात्राणाम् यदि राज्ञः सत्कारं न करोति तदा तस्य निन्दनं भवति । काश्यां

**भिक्षार्थं भ्रमन् व्यासेन यदा भिक्षा न प्राप्तां तथा शापं दत्तवान् ।**
**“मा भुस्त्रैपौरूषा विद्या व्यासोवाराणसीशंपन् ।** [१८]

गृहीत् विद्यो गुरूवे दक्षिणां दद्यात् । केशिध्वजेन खण्क्यिाश्रमे विद्यामधीतवान् । परन्तु दक्षिणां न दत्तवान्। गुरूणा अपि किमपि न उक्तं । “ खण्डिक्याय न दत्तेति मया वै गुरू दक्षिणा ”[१९]
क्षेत्रं हिरण्यं गामश्वं गुरवे प्रीतिमाहवेत । [२०]

गुरूशिष्यैमिलित्वा आजीवनं वेदस्य सरंक्षणं कुर्यात् । सन्यसेत् सर्वकर्मणि वेदमेकं न सन्यसेत ।[२१]
सामाजिकैः वेदाध्ययनं कदापि न त्याज्यं । सर्वै द्विजो भूत्वा वेदं पठनीयम् ।

**“ सर्वेषामेव भूतानां त्रयी संवरणं स्मृतम् ।**
**परित्यजति यो मोहान्ते वै नग्नादयोजनाः ।।** [२२]
**ऋग्यजुः सामज्ञेयं त्रयी वर्णावृत्तिर्द्विजः ।**
**एतामुश्वति यो मोहात्सनग्नः पातकीद्विजः ।।”** [२३]

ऋग्वेद में विद्या को मनुष्य की श्रेष्ठता का आधार बताया गया है । त्वं हि न पिता अस्माकम् परं पारं पारयसीति । [२४]
पिता तुल्यो गुरू परम्पराया प्राप्तां विद्यामग्ने सारयति । अनुकूल गुरू न मिलने पर पिता अपने पुत्रो को स्वयं पढाता था ।

**“ उपनीय क्रमात् शिष्यान् शिवदन्तो महायशः ।**
**वेदानध्यापयामास सांगाश्च सरहस्यकान् ।।”** [२५]

छांदोग्य उपनिषद् में वर्णन है कि आरूणि ने अपने पुत्र को दर्शन के गूढ रहस्य का अध्ययन कराया था ।
तद्धैतादुलकाय आरूणये ज्येष्ठाय पुत्राय पितु ब्रह्म प्रोवाच । [२६] विद्यार्थी के धन हीन होने पर तक्षशिला के आचार्य ने जीवक का सात वर्षो तक भरण-पोषण किया अन्त में उसे भरपूर धन मार्गव्यय दिया जिससे वह अयोध्या तक जा सके ।

प्रचीनकाले वैदिक शिक्षण परम्परायाम् प्रवचनम् तथा श्रवणम् शिक्षणशैल्याः प्रमुखं स्वरूपमासीत् । गुरू शिष्यान सम्बोधयति-

**“त्वन्मुखक्षीर सिन्धूत्था कथेयमृतात्मिका ।**
**कर्णाभ्याम् पिवतां तृप्तिरस्माकं न प्रजायते ।।”**[२७]

मुखादपीत्वा कदाचित तृप्तिं भवितुं शक्नोति कर्णाभ्याम् तृप्तिर्नजायते । वाचना पृच्दनानु प्रेक्षाम्नाय धर्मोपदेशाः । [२८]

योगदर्शनानुसारेण श्रुतिः मननं निदिध्यासनं तथा परं निर्विकल्प समाधौ एतानि शिक्षणपद्धत्या सोपनानि आसन् । श्रवणं मननं तथा परं संभाषणम् । विवेकचूडामणौ अपि लिखितं वर्तते ।

**“ श्रुतेः शतगुणं विद्यान्मननं मननादपि ।**
**निदिध्यासं लक्षणं गुणमनन्तं निर्विकल्पकम् ।।”** [२९]

प्राचीनकाले शिक्षणविधिः पारायण शैल्यामेवासीत् । विद्यार्थिना परायाणिकाः इत्युच्यते । [३०]

पिवत्भागवतं रसमालयम् मुहूरवो रसिकाः भूविभावुकाः । [३१] कर्णरसायनमिदं कर्णाभ्याम् पिब् । एवं दृश्यते लोकेयउदान्ते कर्तव्ये अनुदात्तं करोति खण्डिकोपाध्यायस्तस्मै चपोरां ददात्यन्यत्वं करोषीति । [३२] विद्यार्थी यदि त्रुटिः करोति तदा दण्डस्य विद्यानमप्यासीत् ।

पक्षामिव चक्षुषः भूयासमिति सपरित्कमाचार्यमभेत्य ब्रह्मचारी पठति । [३३]

आवर्षस्य पाठः ऋतुक्रमेण पाठनपद्धतिः आसीत् । यथा अधुना समेस्टर पद्धति उच्यते । वसन्तस्य पाठः यः करोति स वासन्तिकः उच्यते । वर्षपर्यन्तं यः पठति स वार्षिकः । शरदऋतोः पाठः शारादिकः । हेमन्तस्य हैमान्तिकः शिशिरस्य शैशिरिकः । अत्र ग्रीष्मस्य नाम नास्ति । ग्रीष्मस्य ग्रीष्मकालीन अवकाशः भवति स्म ।

कालान्तरेण दारूणाध्यापकाः धोराध्यापकाः काष्ठाध्यापकाः अद्‌भुताध्यापकाः परमाध्यापकाः स्वाध्यापकाः नामकरणं अभवत् । यः अधिकं रटनं कारयति स भृशाध्यापकाःरूपेण प्रसिद्धिं प्राप्तवान्

ये विद्यार्थिनः प्रातः आरभ्य सायं पर्यन्तं गुरूकुले पठन्ति ते आदित्य व्रतिनाः वक्ष्यन्ते । ये छात्राः महानाम्नी ऋचा पर्यनतमेव अध्ययनं कुर्वन्ति तेषां नामानि महानाम्नी व्रतकाः अभवन् यदा माता दुग्धं पाययति तदा लोरी गीतं गायति शाकरव्रतिकः भवतु । महानाम्नी व्रतमेव शाकरीव्रतम् । उक्तं च गोभिलगृह्यसूत्रे 'अथ ह रौरूकि ब्राह्मणं भवति । कुमार ह्वै मातरः पायमानाः आहुः शाकरीणाम् व्रतं परिष्णवो भवतेति । [३४] यदा विद्यार्थी त्रृटिं करोति तदा गुरूमाता वदति-पदं मिथ्या कारयते । स्वरादि दुष्टम् असकृटुच्चारयति' यह उच्चारण ठीक नहीं चल रहा है । वृहदारण्यकोपनिषद में उल्लेख मिलता है कि पिप्लाद और कणाद बडे निर्धन थे । पिप्पलादेन पिप्पफलं भुक्त्वा, पिप्पलादः अभवत् । कणं भुक्त्वा कणादः अभवत् ।

पिप्पल भुक्ते इति पिप्पलादः । कणमतीति कणादः । [३५] याज्ञवल्क्यः अतीव धनिकः आसीत् । [३६] वशिष्ठस्य आश्रमे पर्याप्त सम्पत्तिरासीत् । ससैन्यं यथोचितं सत्कारं प्राप्य तस्य मनसि प्रलोभनम् जातम् अन्ततोगत्वा पराजयं प्राप्य उक्तवान् धिकबलमं क्षत्रियबलं ब्रह्मतेजो बलम् बलम् ।

एकेन बह्मदण्डेन सर्वशास्त्राणि हतानि मे ।।

गौतमस्य शिष्यः उतंकेन गुरोः एतावती सेवा कृता गुरू गृहस्थाश्रमप्रवेशाय अनुमितिरेव न दत्तवान्। स अनुमतिं दातुं विस्मृतवान् ।

शतपथ ब्राह्मणे प्रतिपादितंवर्तते यत् तस्य तपोमयजीवनस्य रूपरेखा स्पष्टासीत् । भूमौशयनम् । उच्चासने कदापि न उपवष्टव्यम् । संगीतनृत्यभ्रमणाद दुरे भवेयुः । ब्रह्मतेजसा कदापि अभिमानो न कर्तव्यः । ख्यातिः निद्रा क्रोधः आत्मश्लाघा सौन्दर्यात् सुगन्धाच्च दुरे उपविशेयुः । ३७ सन्ध्या स्नानं जप होम स्वाध्याय तथा अतिथिपूजने व्यस्तः भवेयुः ।

यास्केनोक्तं केवलं वेदानां कण्ठस्थीकरणेन संतुष्टिः नैव जायते । पतज्जलिनाप्युक्तम्--

**''यदधीतमविज्ञातं निगदेनैव शब्द्यते ।**
**अनग्नाविव शुष्कैंधेन तज्वलति कर्हिचित् ।।''[३८]**

विना समझे बुझे कंठ फाडकर गोखना, जैसे अग्नि के विना सूखे कंडो का ढेर हो ।
एकादश शताब्द्याम् भारत यात्री अलबरूनी लिखति-- ''ब्रह्मण वेदों का विना समझे ही पाठ करके कंठस्थ कर लेते हैं । एक से सुनकर दुसरा कंठस्थ करता है । ब्रह्मणों में वेदों का अर्थ जानने वाला स्वल्प हैं । उन लोगों की संख्या तो ओर कम है जिसका पाण्डित्य इतना बडा हो कि वैदिक विषयों पर और उनकी टीकाओं पर धार्मिक विवाद कर सके ।''३९

अनेन ज्ञायते यत् प्राचीन शिक्षण प्रणाल्याम् आचार्यः एव मूलमासीत् । आचार्यदेव विद्याविटपस्य जन्म भवति स्म । शाखाप्रशाखारूपेण गुरू-शिष्यः सर्वत्र विस्तारं प्राप्नोति । तेषां स्वकीयं संविद्यानम् आसीत् । तेषां स्वकीया मुद्रा आसीत् । विचारात् चरकाः इत्युच्यन्ते । राज्यशासनं तेषां हस्ते आसीत् । राजा सर्वथा आश्रमात् सन्नद्धोभवति ।

## सन्दर्भग्रन्थाः


१. मनुस्मृतिः
२. वाटर्सः ह्वेनसांग, भाग-१, पृ-१६०
३. ऋग्वेद- ३/८/४
४. अथर्ववेद-११/५/३
५. काशिका
६. वा.प.-४/४/६२
७. हितोपदेशः प्रस्तावना-८
८. वा प.- ५/१/१५४
९. शतपथ ब्रह्मण-११/४/१९
१०. विष्णुपुराण-३/१२/३६
११. ब्रह्माण्डपुराण-४/४३/६८
१२. मनुस्मृति-२/१४०
१३. मनुस्मृति-२/१४०-१४१
१४. श्रीमद्भागवत महात्म्य
१५. अष्टाध्यायी-५/२/८४
१६. विष्णुपुराण-३/१२/३६

१७. मत्स्यपुराण-२२७/१५१

१८. मत्स्यपुराण-१८५/२२

१९. विष्णुपुराण-६/६/३८-३९

२०. मनुस्मृति-२/२४६

२१. वायुपुराण-१०५/२८

२२. वायुपुराण-७८/२७

२३. विष्णुपुराण-२/१७/५